# ગણેશ સ્તોત્રમ

નારદ પુરાણ

પ્રણમ્ય શિરસા દેવં ગૌરીપુત્રં વિનાયકં ।
ભક્તાવાસં સ્મરેન નિત્યં આયુઃ કામાર્થસિદ્ધયે ॥ 1 ॥

પ્રથમં વક્રતુણ્ડં ચ એકદન્તં દ્વિતીયકં ।
તૃતીયં કૃષ્ણપિઙ્ગાક્ષં ગજવક્ત્રં ચતુર્થકમ ॥ 2 ॥

લમ્બોદરં પન્ચમં ચ ષષ્ઠં વિકટમેવ ચ ।
સપ્તમં વિઘ્નરાજં ચ ધૂમ્રવર્ણં તથાષ્ટમમ ॥ 3 ॥

નવમં ભાલચન્દ્રં ચ દશમં તુ વિનાયકમ ।
એકાદશં ગણપતિં દ્વાદશં તુ ગજાનનમ ॥ 4 ॥

દ્વાદશૈતાનિ નામાનિ ત્રિસન્ધ્યં યઃ પઠેન નરઃ ।
ન ચ વિઘ્નભયં તસ્ય સર્વસિદ્ધિકરં પ્રભો ॥ 5 ॥

વિદ્યાર્થી લભતે વિદ્યાં ધનાર્થી લભતે ધનમ ।
પુત્રાર્થી લભતે પુત્રાન મોક્ષાર્થી લભતે ગતિમ ॥ 6 ॥

જપેત ગણપતિસ્તોત્રં ષડ્ભિર માસૈઃ ફલં લભેત ।
સંવત્સરેણ સિદ્ધિં ચ લભતે નાત્ર સંશયઃ ॥ 7 ॥

અષ્ટભ્યો બ્રાહ્મણેભ્યશ્ચ લિખિત્વા યઃ સમર્પયેત ।
તસ્ય વિદ્યા ભવેત સર્વા ગણેશસ્ય પ્રસાદતઃ ॥ 8 ॥

ઈતિ નારદ પુરાણે સન્કટ નાશન ગણેશ સ્તોત્રં સમ્પૂર્ણમ ॥